# shrIrAdhAShTottarashatanAmastotram

# શ્રીરાધાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Radha Ashtottarashatanama Stotram

File name : rAdhAShTottarashatanAmastotram.itx

Category : devii, rAmAnujasampradAya, aShTottarashatanAma, radha, devI

Location : doc_devii

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : stotramAlA, print page 367

Acknowledge-Permission: Shri Tripursundari Ved Gurukulam, Sahibabad (Ghaziabad), UP

Latest update : December 20, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2021

*sanskritdocuments.org*

# શ્રીરાધાષ્ટોત્તરશતનામસ્તોત્રમ્

અથાસ્યાઃ સમ્પ્રવક્ષ્યામિ નામ્નામષ્ટોત્તરં શતમ્ ।
યસ્ય સઙ્કીર્તનાદેવ શ્રીકૃષ્ણં વશયેદ્ધ્રુવમ્ ॥ ૧॥

રાધિકા સુન્દરી ગોપી કૃષ્ણસઙ્ગમકારિણી ।
ચઞ્ચલાક્ષી કુરઙ્ગાક્ષી ગાન્ધર્વી વૃષભાનુજા ॥ ૨॥

વીણાપાણિઃ સ્મિતમુખી રક્તાશોકલતાલયા ।
ગોવર્ધનચરી ગોપી ગોપીવેષમનોહરા ॥ ૩॥

ચન્દ્રાવલી-સપત્ની ચ દર્પણસ્થા કલાવતી ।
કૃપાવતી સુપ્રતીકા તરુણી હૃદયઙ્ગમા ॥ ૪॥

કૃષ્ણપ્રિયા કૃષ્ણસખી વિપરીતરતિપ્રિયા ।
પ્રવીણા સુરતપ્રીતા ચન્દ્રાસ્યા ચારુવિગ્રહા ॥ ૫॥

કેકરાક્ષા હરેઃ કાન્તા મહાલક્ષ્મીઃ સુકેશિની ।
સઙ્કેતવટસંસ્થાના કમનીયા ચ કામિની ॥ ૬॥

વૃષભાનુસુતા રાધા કિશોરી લલિતા લતા ।
વિદ્યુદ્વલ્લી કાઞ્ચનાભા કુમારી મુગ્ધવેશિની ॥ ૭॥

કેશિની કેશવસખી નવનીતૈકવિક્રયા ।
ષોડશાબ્દા કલાપૂર્ણા જારિણી જારસઙ્ગિની ॥ ૮॥

હર્ષિણી વર્ષિણી વીરા ધીરા ધારાધરા ધૃતિઃ ।
યૌવનસ્થા વનસ્થા ચ મધુરા મધુરાકૃતિઃ ॥ ૯॥

વૃષભાનુપુરાવાસા માનલીલાવિશારદા ।
દાનલીલા દાનદાત્રી દણ્ડહસ્તા ભ્રુવોન્નતા ॥ ૧૦॥

સુસ્તની મધુરાસ્યા ચ બિમ્બોષ્ઠી પઞ્ચમસ્વરા ।
સઙ્ગીતકુશલા સેવ્યા કૃષ્ણવશ્યત્વકારિણી ॥ ૧૧॥

તારિણી હારિણી હ્રીલા શીલા લીલા લલામિકા ।
ગોપાલી દધિવિક્રેત્રી પ્રૌઢા મુગ્ધા ચ મધ્યકા ॥ ૧૨॥

સ્વાધીનપતિકા ચોક્તા ખણ્ડિતા યાઽભિસારિકા ।
રસિકા રસિની રસ્યા રસનાસ્ત્રૈકશેવધિઃ ॥ ૧૩॥

પાલિકા લાલિકા લજ્જા લાલસા લલનામણિઃ ।
બહુરૂપા સુરૂપા ચ સુપ્રસન્ના મહામતિઃ ॥ ૧૪॥

મરાલગમના મત્તા મન્ત્રિણી મન્ત્રનાયિકા ।
મન્ત્રરાજૈકસંસેવ્યા મન્ત્રરાજૈકસિદ્ધિદા ॥ ૧૫॥

અષ્ટાદશાક્ષરફલા અષ્ટાક્ષરનિષેવિતા ।
ઇત્યેતદ્રાધિકાદેવ્યા નામ્નામષ્ટોત્તરશતમ્ ॥ ૧૬॥

કીર્તયેત્પ્રાતરુત્થાય કૃષ્ણવશ્યત્વસિદ્ધયે ।
એકૈકનામોચ્ચારેણ વશી ભવતિ કેશવઃ ॥ ૧૭॥

વદને ચૈવ કણ્ઠે ચ બાહ્વોરુરસિ ચોદરે ।
પાદયોશ્ચ ક્રમેણાસ્યા ન્યસેન્મન્ત્રાન્પૃથક્પૃથક્ ॥ ૧૮॥

ઇત્યૂર્ધ્વામ્નાયે રાધાષ્ટોત્તરશતનામકથનં નામ પ્રથમઃ પટલઃ ॥

॥ ૐ તત્સત્ ॥

Proofread by PSA Easwaran

*shrIrAdhAShTottarashatanAmastotram*

pdf was typeset on December 20, 2021

Please send corrections to *sanskrit@cheerful.com*